स्स्कृतस्वाध्यायः

## पिता पित्रयोः सम्भाषणम्

सप्तमीविभक्ति

भूते क्तवतु

पिता - आगच्छतु । यात्रा कथम् आसीत् ?

शिवरामः - सम्यक् आसीत् तात ।

पिता - भवान् कदा मुम्बई प्राप्तवान् ?

शिवरामः - अहं सोमवासरे प्रातः 7 वादनं एव प्राप्तवान् ।

पिता - अनन्तरं भवान् किं किं कृतवान् ?

शिवरामः - ततः मित्रस्य गृहं गतवान् । तत्रैव स्नानमपि कृतवान् । उपहारं खादितवान् । ततः कुवेम्पु मन्दिरं गतवान्

पिता - किं भवान् एकः एव गतवान् ?

शिवरामः - नैव, मम मित्रम् अहं च गतवन्तौ । कार्यक्रमः न आरब्धः आसीत् । समये आवां प्राप्तवन्तौ ।

पिता -तदनन्तरम्......?

शिवरामः -कार्यक्रमः दशवादने आरब्धः श्यामला प्रार्थनां गीतवती । स्वागतानन्तरं मम भाषणम् आसीत् । अहं भाषणं कृतवान् । अध्यक्षः मां स्वाघितवान् । जनाः उच्चैः हर्षोद्गारं कृतवन्तः । करताडनमपि कृतवन्तः । अधिकारी आगामिवर्षे अपि सम्मेलनं प्रति आगमनाय प्रार्थितवान् । 11.30 वादने कार्यक्रमः समाप्तः । अन्ते महिलाः 'वन्दे मातरं' गीतवत्यः ।

पिता - पुनः मित्रस्य गृहं किं न भवान् गतवान् ?

शिवरामः - कुवेम्पुमन्दिरतः तस्य गृहं बहु दूरे अस्ति । अतः अहं साक्षात् याननीस्थानकं गतवान् । तत्र मम वयस्यौ मिलितवन्तौ । बहुकालं वयं सम्भाषणं कृतवन्तः ततः मध्याह्ने 3 वादने अहं प्रस्थितवान्

पिता - अस्तु । स्नानं करोतु । भोजनं करोतु । कञ्चित्कालं विश्राम स्वीकरोतु ।

शिवरामः - अस्तु । तात ।